मोचरसरसाञ्जनकुम्भीकस्रोतोऽञ्जनपद्मकेशर-योजनवल्ल्यो दीर्घमूला चेति ॥”)

दीर्घमूली, स्त्री, (दीर्घं मूलमस्याः । ङीप् ।) दुरालभा । इति शब्दमाला ॥

दीर्घरदः, पुं, (दीर्घौ रदौ दन्तौ यस्य ।) शूकरः । इति त्रिकाण्डशेषः ॥ आयतदन्ते, त्रि ॥

दीर्घरसनः, पुं, (दीर्घा रसना जिह्वा यस्य ।) सर्पः । इति शब्दचन्द्रिका ॥

दीर्घरागा, स्त्री, (दीर्घः अधिककालस्थायी रागो यस्याः ।) हरिद्रा । इति राजनिर्घण्टः ॥

दीर्घरात्रं, क्ली, (दीर्घाः प्रचुरा रात्रयः सन्त्यत्र । अर्श आदित्वात् अच् ।) चिरकालम् । इति त्रिकाण्डशेषः ॥ (पुं, दीर्घा चासौ रात्रिश्चेति विग्रहे ।“सर्व्वैकदेशसङ्ख्यातपुण्यवर्षादीर्घाद्रात्रेः ।” इति मुग्धबोधसूत्रात् अः । पुंस्त्वमभिधानात् ।) दीर्घा निशा च ॥

दीर्घरोमा,[न्]पुं, (दीर्घाणि रोमाणि यस्य ।)भल्लूकः । इति शब्दार्थकल्पतरुः ॥ (महादेवस्य भूतानामन्यतमः । यथा, हरिवंशे भविष्यपर्व्वणि ।१४।२।

“तस्याग्रे समपद्यन्त भूतसङ्घाः सहस्रशः ।”

“दीर्घरोमा दीर्घभुजो दीर्घबाहुर्निरञ्जनः ॥”)

दीर्घरोहिषकं, क्ली, (दीर्घं रोहिषम् । ततः स्वार्थे संज्ञायां वा कन् ।) कत्तृणभेदः । सुगन्धितृणविशेषः । वड़ रोहिष इति भाषा । तत्पर्य्यायः । दृढ़काण्डम् २ दृढ़च्छदम् ३ वक्रोष्टम् ४ दीर्घनालम् ५ तिक्तसारम् ६ । अस्य गुणाः । तिक्तत्वम् । कटुत्वम् । उष्णत्वम् । कफवातभूतग्रहविषनाशित्वम् । व्रणक्षतविरोपणत्वञ्च । इति राजनिर्घण्टः ॥

दीर्घवंशः, पुं, (दीर्घो वंश इव ।) नलः । इति राजनिर्घण्टः ॥ आयते तृणध्वजे कुले च ॥

दीर्घवक्त्रः, पुं, स्त्री, (दीर्घं वक्त्रं मुखं यस्य ।) हस्ती । इति शब्दमाला ॥ (लम्बवदने, त्रि ॥)

दीर्घवर्च्चिका, स्त्री, कुम्भीरः । इति शब्दार्थकल्पतरुः ॥

दीर्घवल्ली, स्त्री, (दीर्घा वल्ली ।) महेन्द्रवारुणी । पातालगरुड़ी । पलाशी । इति राजनिर्घण्टः ॥ आयता लता च ॥

दीर्घवृन्तः, पुं, (दीर्घं वृन्तं यस्य ।) श्योणाकवृक्षः । इत्यमरः ।२।४।५७॥ (अस्य पर्य्यायो यथा, वैद्यकरत्नमालायाम् ।

“श्योणाको भूतपुष्पश्च पूतिवृक्षो मुनिद्रुमः ।

दीर्घवृन्तश्च कट्वङ्गो भल्लूकश्टुण्टुकोऽरलुः ॥”)

दीर्घवृन्तकः, पुं, (दीर्घवृन्त+स्वार्थे कन् ।) श्योणाकः । इति शब्दमाला ॥ श्योणाकप्रभेदः । इति राजनिर्घण्टः ॥ (श्योनाकशब्देऽस्य विवरणं ज्ञातव्यम् ॥)

दीर्घवृन्ता, स्त्री, (दीर्घं वृन्तं यस्याः ।) इन्द्रचिर्भिटी । इति राजनिर्घण्टः ॥

दीर्घवृन्तिका, स्त्री, (दीर्घं वृन्तं यस्याः । कप् । टापि अत इत्वम् ।) एलापर्णी । इति शब्दचन्द्रिका ॥

दीर्घशरः, पुं, (दीर्घः शरः ।) यावनालः । इति राजनिर्घण्टः ॥

दीर्घशाखः, पुं,(दीर्घा शाखा यस्य ।) शणवृक्षः । इति राजनिर्घण्टः ॥ शालवृक्षः । इति शब्दचन्द्रिका ॥

दीर्घशाखिका, स्त्री, (दीर्घा शाखा यस्याः । कापि अत इत्वम् ।) नीलाम्लीक्षुपः । इति राजनिर्घण्टः ॥

दीर्घशिम्बिकः, पुं, (दीर्घा शिम्बिर्यस्य । कप् ।) चवः । इति राजनिर्घण्टः ॥

दीर्घशूककं, क्ली, (दीर्घं शूकं यस्य । कप् ।) राजान्नम् । इति राजनिर्घण्टः ॥

दीर्घसक्थं, त्रि, (दीर्घे सक्थिनी यस्य । “बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच् ।” ५ । ४ । ११३। इति षच् ।) दीर्घोरु । इति व्याकरणम् ॥

दीर्घसक्थि, क्ली, (दीर्घे सक्थिनी यस्य । स्वाङ्गादित्युक्तेरत्र न षच् ।) शकटम् । इति व्याकरणम् ॥

दीर्घसत्त्रं, क्ली, (दीर्घं बहुकालसाध्यं सत्त्रम् ।) यज्ञविशेषः । (यथा, भागवते । १ । १ । २१ ।

“कलिमागतमाज्ञाय क्षेत्रेऽस्मिन् वैष्णवे वयम् ।

आसीना दीर्घसत्त्रेण कथायां सक्षणा हरेः ॥”)

तीर्थविशेषः । इति शब्दार्थकल्पतरुः ॥ (यथा, महाभारते । ३ । ८२ । १०३—१०४ ।

“ततो गच्छेत राजेन्द्र ! दीर्घसत्त्रं यथाक्रमम् ।

तत्र ब्रह्मादयो देवाः सिद्धाश्च परमर्षयः ।

दीर्घसत्त्रमुपासन्ते दीक्षिता नियमव्रताः ॥

गमनादेव राजेन्द्र ! दीर्घसत्त्रमरिन्दम ! ।

राजसूयाश्वमेधाभ्यां फलं प्राप्नोति मानवः ॥”)

दीर्घसुरतः, पुं, (दीर्घं बहुकालव्यापकं सुरतं मैथुनं यस्य ।) कुक्कुरः । इति त्रिकाण्डशेषः ॥

दीर्घसूत्रः, त्रि, (दीर्घेण बहुकालेन सूत्रं कार्य्यारम्भो यस्य ।) चिरक्रियः । इत्यमरः ।३।१।१७॥

“अदीर्घसूत्रश्च भवेत् सर्व्वकर्म्मसु पार्थिवः ।

दीर्घसूत्रस्य नृपतेः कर्म्महानिर्ध्रुवं भवेत् ॥

रागे दर्पे च माने च द्रोहे पापे च कर्म्मणि ।

अप्रिये चैव कर्त्तव्ये दीर्घसूत्रः प्रशस्यते ॥”

इति मत्स्यपुराणम् ॥

(आयततन्तुकम् । यथा, माघे । १० । ६१ ।

“मेखलागुणविलग्नमसूयां

दीर्घसूत्रमकरोत् परिधानम् ॥”)

विस्तृते तन्तौ, क्ली ॥

दीर्घसूत्री, [न्] त्रि, (दीर्घसूत्रं बहुकालं व्याप्य कर्म्मारम्भोऽस्यस्येति । दीर्घसूत्र+इनिः ।) दीर्घसूत्रः । इति हलायुधः ॥ (यथा, गीतायाम् । १८ । २८ ।

“विषादी दीर्घसूत्री च कर्त्ता तामस उच्यते ॥”)

दीर्घस्कन्धः, पुं, (दीर्घः स्कन्धो यस्य ।) तालवृक्षः । इति राजनिर्घण्टः ॥

दीर्घा, स्त्री, (दीर्घ+टाप् ।) पृश्निपर्णी । इति राजनिर्घण्टः ॥ (अस्याः पर्य्याया यथा,—

“पृश्निपर्णी पृथक्पर्णी लाङ्गुली क्रोष्टुपुच्छिका ।

धामनिः कलशी तन्वी गुहा क्रोष्टुकमेखला ॥

दीर्घा शृगालविन्ना सा श्रीपर्णी सिंहपुच्छिका ।

दीर्घपत्रा त्वतिगुहा पृतिला चित्रपर्णिका ॥”

इति वैद्यकरत्नमालायाम् ॥)

दीर्घाध्वगः, त्रि, (दीर्घमध्वानं गच्छतीति । गम+डः ।) लेखहारः । धावड़िया इति भाषा । उष्ट्रे, पुं । इति मेदिनी ॥ गे, ५७ ॥

दीर्घायुः, [स्] पुं, (दीर्घं आयुर्यस्य ।) शाल्मलिवृक्षः । काकः । जीवकवृक्षः । मार्कण्डेयः । चिरजीविनि, त्रि । इति मेदिनी । से, ५५ ॥ (यथा, महाभारते । ७ । ५७ । १४ ।

“दीर्घायुषः प्रजाः सर्व्वा युवा न म्रियते तदा ॥”)

“तत्र महापाणि-पाद-पार्श्वपृष्ठस्तनाग्रदशनवदनस्कन्धललाटं दीर्घाङ्गुलिपर्व्वोच्छ्वासप्रेक्षणबाहुं विस्तीर्णभ्रूस्तनान्तरोरस्कं ह्रस्वजङ्घामेढ्रग्रीवं गम्भीरसत्त्वस्वरनाभिमनुच्चैर्बद्धस्तनमुपचितमहारोमशकर्णं पश्चान्मस्तिष्कं स्नातानुलिप्तं मूर्द्धानुपूर्व्व्या विशुष्यमाणशरीरं पश्चाच्च विशुष्यमाणहृदयं पुरुषं जानीयाद्दीर्घायुः खल्वयमिति ।”

“गूढ़सन्धिसिरास्नायुः संहताङ्गः स्थिरेन्द्रियः ।

उत्तरोत्तरसुक्षेत्रो यः स दीर्घायुरुच्यते ॥

गर्भात् प्रभृत्यरोगो यः शनैः समुपचीयते ।

शरीरज्ञानविज्ञानैः स दीर्घायुः समासतः ॥”

इति सुश्रुते सूत्रस्थाने ३५ अध्याये ॥)

दीर्घायुधः, पुं, (दीर्घं आयुधः ।) कुन्तास्त्रम् । इति त्रिकाण्डशेषः ॥ (दीर्घौ आयुधौ इव दन्तौ यस्य ।) शूकरः । इति शब्दमाला ॥

दीर्घायुष्यः, पुं, (दीर्घं आयुष्यं जीवनं यस्य ।) श्वेतमन्दारकः । इति राजनिर्घण्टः ॥

दीर्घालर्कः, पुं, (दीर्घ अलर्क इव ।) श्वेतमन्दारकः । इति राजनिर्घण्टः ॥

दीर्घिका, स्त्री, (दीर्घेव । दीर्घा+संज्ञायां कन् । टापि अत इत्वम् ।) त्रिशतधनुःपरिमितजलाशयः । दीघि इति भाषा । तत्पर्य्यायः । वापी,२ । इत्यमरः ।१।१०।२८॥ (यथा, रघुः । १६ । १३ ।

“वनेरिदानीं महिषैस्तदम्भः

शृङ्गाहतं क्रोशति दीर्घिकाणाम् ॥”)

तज्जलगुणाः । गुरुत्वम् । कटुत्वम् । क्षारत्वम् । पित्तलत्वम् । कफवातनाशित्वञ्च । हिङ्गुपत्री । इति राजनिर्घण्टः ॥

दीर्घेर्व्वारुः, पुं, (दीर्घा इर्व्वारुः ।) डङ्गरी । इति राजनिर्घण्टः ॥

दीर्णः, त्रि, (दॄ विदारे+क्तः ।) विदारितः । (यथा, गोः रामायणे । २ । ३८ । २८ ।

“आयसं हृदयं नूनं राममातुः सुसंहतम् ।

यन्न दीर्णं प्रिये पुत्त्रे वनवासाय निर्गते ॥”)

भीतः । इति मेदिनी । णे, १६ ॥ (यथा, महाभारते । ६ । ३ । ७६ ।

“एको दीर्णो दारयति सेनां सुमहतीमपि ।

तां दीर्णामनु दीर्य्यन्ते योधाः शूरतरा अपि ॥”)

दीविः, पुं, किकीदिविः । इति शब्दमाला ॥

दु, गतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-अनिट् ।) दवति । इति दुर्गादासः ॥